संस्कृतवार्ता:

04.07.2024

सायम् - 06:20

मुख्यवार्ता:

· प्रधानमन्त्री नरेन्द्रमोदी उक्तवान् यत् आतङ्कवादः कस्मिन्नपि रूपे उत आतंकवादस्य कथमपि प्रकटीकरणं न्याय्यं समुचितं वा अस्ति इति अनुमोदनं कर्तुं न शक्यते।

· प्रधानमन्त्री श्रीनरेन्द्रमोदी अद्य नवीदिल्लीनगरे स्वनिवासस्थाने विंशतिम् प्रतिविंशति-विश्व-चषक-विजेत्रा भारतीय-पुरुष-क्रिकेट्दलेन सह मिलितवान्।

· झारखण्ड-मुक्ति-मोर्चायाः कार्यकारि-अध्यक्षः हेमन्तसोरेनः अद्य झारखण्डस्य मुख्यमन्त्रित्वेन शपथं स्वीकृतवान् ।

· असम-अरुणाचलप्रदेशयोः तोय-प्लव-स्थितिः गभीरायते। सैन्यबलेन आपदुद्धार-अभियानं सजवं चाल्यते ।

· विम्बल्डन्-टेन्निस्-स्पर्धायां भारतस्य यूकी-भांबरी फ्रान्स-देशीयेन अल्बानो-ओलीवेटी इत्यनेन सह सम्भूय स्पर्धिष्यते ।

विदेशमन्त्री-शिखरसम्मेलनम्

प्रधानमन्त्री नरेन्द्रमोदी उक्तवान् यत् आतङ्कवादः कस्मिन्नपि रूपे उत आतंकवादस्य कथमपि प्रकटीकरणं न्याय्यं समुचितं वा अस्ति इति अनुमोदनं कर्तुं न शक्यते। सः अवदत् यत् अन्ताराष्ट्रीयसमुदायेन ते देशाः ये आतङ्कवादिनां कृते आश्रयं ददति, आतंकिभ्यः सुरक्षितस्थानानि प्रदातुं, आतङ्कवादस्य अनुमोदनं च कुर्वन्ति, तेषां देशानां पृथक्करणपूर्वकं मुखाच्छादकम् अपाकरणीयम् ।

एषा टिप्पणी विदेशमन्त्रिणा डॉ.एस.जयशङ्करेण कृता। विदेशमन्त्री सम्प्रति कजाकिस्तानस्य आस्तानानगरे आयोज्यमाने एस.सी.ओ. इति शिखरसम्मेलने परिचर्चावसरे भाषते स्म। विदेशमन्त्रिणा अत्र सम्मेलने चीनदेशस्य विदेशमन्त्रिणा वांग-यी इत्यमुना सहापि मेलनं कृतम् ।

मेलनेस्मिन् उभयोः देशयोः सीमावर्तिक्षेत्राणां विवादस्य शीघ्रसमाधान-विषये मन्त्रणा जाता। उभावपि पक्षौ राजनयिकमाध्यमेन सैन्यमाध्यमेन च विवाद-समाधानार्थं सहमतौ जातौ । डॉ.एस.जयशङ्करेण प्रोक्तं यत् वास्तविक-नियन्त्रणरेखायाः सम्माननम्, सीमावर्तिक्षेत्रेषु शान्तिसन्धारणं च निश्चप्रचं कर्तुं नितान्तमावश्यकमस्ति । अमुना प्रोक्तं यत् परस्पर-सम्माननम्, मिथः संवेदनशीलता उभयोः हितसाधनं च भारत-चीनयोः द्विपाक्षिक-सम्बन्धानां नेतृत्वं करिष्यन्ति ।

<u>प्रधानमन्त्री</u>

प्रधानमन्त्री श्रीनरेन्द्रमोदी अद्य नवीदिल्लीनगरे स्वनिवासस्थाने विंशतिम् प्रतिविंशति-विश्व-चषक-विजेत्रा भारतीय-पुरुष-क्रिकेट्दलेन सह मिलितवान्। भारतीय-क्रिकेट-दल-नायकः रोहित शर्मा, प्रशिक्षकः राहुल द्रविडः, विराट कोहली, हार्दिक पाण्ड्या, सूर्य कुमार यादवः, जसप्रीत बुमराहसदृशाः अन्ये क्रीडकाः उपस्थिताः आसन्। प्रधानमन्त्री क्रीडकैः सह संवादं कृतवान् यत्र ते स्वस्य अनुभवान् विनिमयी-कृतवन्तः। भारतीयक्रिकेटदलम् अद्य प्रातः नवदिल्लीं सम्प्राप्तम्, तेषां भव्यं स्वागतं जातम्। भारतीय-पुरुष-क्रिकेट्-दलं बार्बडोस्-नगरात् स्वदेशं प्रत्यागतम्, अपि च विश्वविजयीभूय दलस्य पुनरागमनं भव्यं जातम् । गतशनिवासरे जूनमासस्य ऊनत्रिंशे दिनाङ्के दक्षिण-आफ्रिका-विरुद्धं रोमाञ्चकर्याम् अन्तिम-क्रीडायां भारतीय-दलेन विश्वचषकं स्वायत्तीकृतम्। एतस्मिन् विशेषे क्षणे दलं प्रधानमन्त्रिणा नरेन्द्रमोदिना मिलितम्। क्रीडकैः मोदिना सह प्रातः भोजनं कृतम्। अत्रावसरे श्रीमोदिना तेषां क्रीडकानां विजयस्य प्रशंसा कृता। तदनन्तरं दलं पथप्रदर्शनार्थं मुम्बईनगरं प्रति निर्गतम्। दलनायकः रोहितशर्मा प्रशंसकानां कृते उत्सवे सम्मिलितुं हृदयहारि आह्वानं कृतवान्। अवधेयमस्ति यत् तेषां क्रीडकानां भारतं पुनरागमनं झञ्झावातेन विलम्बितम् चेदपि सर्वे प्रशंसकाः उत्सुकतापूर्वकं स्वदलस्य प्रतीक्षां कृतवन्तः।

झारखण्ड- हेमन्तसोरेनः

झारखण्ड-मुक्ति-मोर्चायाः कार्यकारि-अध्यक्षः हेमन्तसोरेनः अद्य झारखण्डस्य मुख्यमन्त्रित्वेन शपथं स्वीकृतवान्। राज्यपालेन सि. पी राधाकृष्णन् वर्येण राजभवने तस्मै पदगोपनीयतायाः शपथवचनं कारितम्। अवधेयमस्ति यत् हेमन्तसोरेनः तृतीयवारं मुख्यमन्त्रिपदम् आरोहति।

असम-जलौघः

गतमासस्य ऊनत्रिंशत्-दिनाङ्कात् आरभ्य अविरामवृष्ट्या भृशं प्रभावितेषु असमस्य धेमाजीमण्डलस्य सिवागुरी-ग्रामेषु, अरुणाचलप्रदेशस्य पूर्व-सियाङ्गमण्डलस्य मेर-ग्रामेषु च व्यापकरूपेण जलौघ-जनोद्धार-कार्यक्रमेषु भारतीयसेना सक्रियरूपेण संलग्ना अस्ति। भारतीयसैन्यबलेन राज्य-आपदा-मोचन-बलेन च सम्भूय जलौघ-प्रभावितक्षेत्रेषु जलौघपीडितानां जनानां समुद्धाराय तीव्राभियानं प्रचालितमस्ति। अस्मिन् अभियाने सिवागुरी, नामसिङ्गघाट्, पगलाम, ओरियानघाट् इत्येतेषु क्षेत्रेषु अष्टचत्वारिंशत् नागरिकाः ससुरक्षं निष्कासिताः । येषु सप्तदश बालकाः, विंशति-महिलाः, एकादश वृद्धाः नागरिकाः च समाविशन्ति। ततः परं इमे समुद्धारिताः जनाः अस्थायी आश्रयस्थानेषु संस्थापिताः। जलप्रलयग्रस्तानाम् एतेषां सर्वेषां कृते भोजनं, जलं, चिकित्सासाहाय्यं च सैन्यबलेन प्रदत्तम् अस्ति।

विम्बल्डन-बोपन्ना

विम्बल्डन्-टेन्निस्-स्पर्धायां भारतस्य यूकी-भांबरी फ्रान्स-देशीयेन अल्बानो-ओलीवेटी इत्यनेन सह सम्भूय कजाकिस्थानदेशस्य अलेक्जेण्डर-बुब्लिकस्य अलेक्जेण्डर-शेवचेंको इत्यस्य च युगलं विरुद्ध्य स्पर्धिष्यते। एन.श्रीराम बालाजीब्रिटेनस्य ल्यूक-जोन्सनेन समं सम्मिल्य क्रोएषिया देशस्य मेट्-पाविचस्य अथ अल्-साल्वाडोरस्य मार्सेलो अरेवलो इत्यस्य च युगलं सम्मुखीकरिष्यति । अपि च रोहन बोपन्ना निज-आस्ट्रेलिया-देशीयेन सह-क्रीडकेन मेथ्यू-एब्डेन् इत्यमुना सह सम्भूय जर्मन् देशीयस्य हेण्ड्रिक-जेबेंसस्य, कोन्स्टण्टिनस्य च युगलं विरिद्ध्य क्रीडिष्यति ।

## संयुक्त-अरब-अमीरात

अधुना यूएई इति संयुक्त-अरब-अमीरात-देशे यात्रारताः भारतीयाः प्रवासिजनाः च विक्रयण-यन्त्र-माध्यमेन यू-पि-आई क्यू-आर-कोड इति विधिना च धनस्य आदान-प्रदानं कर्तुं शक्नुवन्ति। एन.पी.सी.आई. इन्टरनेशनल् पेमेंट्स् लिमिटेड् इत्यनेन सम्पूर्णे मध्यपूर्वे आफ्रिकादेशे च मुख्यतया डिजिटल-वाणिज्य-सक्षम-कर्तृणा नेटवर्क् इन्टरनेशनल् इत्यनेन सह सहयोगत्वेन विक्रयस्थानेषु QR-कोड्-आधारितस्य एकीकृत-धनविनिमय-अन्तरफलकीयं सौविध्यं यूएई-देशे भारतीयेभ्यः यत्रिभ्यः सुलभायितम् अस्ति। अस्य उपक्रमस्य उद्देश्यं यूएई-देशे भारतीयपर्यटकानाम् कृते निर्विघ्नव्यवहार-अनुभवं प्रदातुं वर्तते। सामान्यापणेषु, आतिथ्य-परिवहन-सुपरमार्केट्-चेत्यादिषु विविधक्षेत्रेषु प्रसारितानां द्विलक्षाधिकेषु विपण्यकेन्द्रेषु एतत् सौविध्यं प्रदत्तमस्ति । अवधेयमस्ति यदत्र लोकप्रिय-पर्यटनस्य अवकाश-आकर्षणस्य च विविध-प्रतिष्ठान-श्रेणयः अपि समाविष्टाः भवन्ति ।

## राजनाथसिंह-रिचार्डयोः दौरभाषिक-मन्त्रणा

अद्य रक्षामन्त्री राजनाथसिंहः आस्ट्रेलियादेशस्य उपप्रधानमन्त्रिणा रक्षामन्त्रिणा च रिचर्ड मार्लेस् इत्यनेन सह दूरभाषेण वार्तालापं कृतवान्। समाजिक-संजालीय-सन्देशे सिंहमहोदयः अवदत् यत् द्विपक्षीय-रक्षा-सहकार्य-सम्बद्धानां विविध-विषयाणां समीक्षा कृता, यत्र भारत-प्रशांत-क्षेत्रे द्वयोः देशयोः निकटतर-सहकार्यं केन्द्रीकृतम् आसीत्। सः अवदत् यत्, भारतं ऑस्ट्रेलिया-देशेन सह व्यापक-रणनीतिक-सहयोग-विषये महत् मूल्यं ददाति। रक्षामन्त्रालयस्य अनुसारं द्वयोः मन्त्रिणोः व्यापक-रणनीतिक-सहमतेः अन्तर्गतं रक्षा-सहकार्यस्य परिवर्तनकर-प्रगतिः अवलोकिता ।

## उपराष्ट्रपतिः जगदीपधनखडः

उपराष्ट्रपतिः जगदीपधनखडः शनिवासरात् केरलस्य द्विदिवसीयभ्रमणं करिष्यति। स्वस्य भ्रमणस्य प्रथमदिने धनखड-महोदयः भारतीय-अन्तरिक्ष-विज्ञान-प्रौद्योगिकी-संस्थायाः द्वादशे दीक्षान्तसमारोहे मुख्यातिथिरूपेण दीक्षान्तसम्बोधनं करिष्यति। सः उत्कृष्ट-छात्राणां कृते संस्थायाः उत्कृष्टता-पदकं अपि प्रदास्यति। जुलैमासस्य सप्तमे दिनाङ्के कोल्लम-अष्टमुदी-पृष्ठजलयोः भ्रमणं कर्तुं उपराष्ट्रपतिना निश्चितम् अस्ति

## ब्रिटेन-निर्वाचनम्

ब्रिटन्-देशे महत्त्वपूर्णस्य सामान्य-निर्वाचनस्य कृते देशे सर्वत्र मतदानं प्रचलति यतः राष्ट्रं नूतनस्य प्रधानमन्त्रिणः चयनस्य सज्जतां करोति। तत्र हि मतदानं भारतीयमानकसमये रात्रौ सार्ध-द्वादश-वादने आरब्धम्, अथ रात्रौ सार्ध-द्विवादनपर्यन्तं कोटिकोटिजनाः निजमताधिकारस्य प्रयोगं करिष्यन्ति। तदनु निर्वाचनोत्तर-अनुमानित-परिणामाः प्रसारयिष्यन्ति, तत्र हि समस्ते देशे मतदानस्य शान्ति-पूर्णरीत्या आयोजनार्थं चत्वारिंशत् सहस्रमितानि मतदानकेन्द्राणि निर्मितानि सन्ति ।

## ऋतु-विज्ञान-विभागः

ऋतु-विज्ञान-विभागः ब्रवीति यत् आगामिषु पञ्चदिनेषु देशस्य पूर्वोत्तरभागेषु धारासार-वृष्टेः सम्भावना वर्तते। विभागेन प्रोक्तं यत् ऋतु-विक्षोभ-कारणेन अरुणाचलप्रदेशे, असमे, मेघालये च विभिन्नेषु स्थानेषु अतिशय-वृष्टिः सम्भविष्यति इति आशङ्क्यते ।

## ऋतु-विज्ञान-विभागः-दिल्ली

राष्ट्रीय-राजधान्याः दिल्ल्याः भूरि भूभागेषु गतरात्रात् प्रातः पर्यन्तं सामान्य-वृष्टिः अभवत् । अनया वृष्ट्या निदाघ-घर्मेण निपीडिताः दिल्लीवासिनः किंचित् आनन्दिताः भवन्ति । ऋतु-विज्ञान-विभागः ब्रवीति यत् आगामिषु चतुर्दिनेषु देशस्य पश्चिमोत्तर-भागेषु मध्यभागेषु च घनसारवृष्टिः सम्भविष्यति इति अनुमीयते । अथ च जम्मू-कश्मीर-लद्दाख-गिल्गिट-बाल्टीस्तान-मुजफ्फराबाद-हिमाचलप्रदेश-हरियाणा-चण्डीगढ-मध्यप्रदेश-पंजाब-पूर्वीयराजस्थानेषु च अद्य अतिशयवृष्टिः भविष्यति इत्यपि अनुमीयते, सहैव उत्तरप्रदेशे अपि अतिवृष्ट्याः सम्भावना वर्तते। अथ च उत्तराखण्डे, असमे, मेघालये चापि अद्य महती वृष्टिः भविष्यति ।

।। इति वार्ताः ।।